# AMRITA VIDYALAYAM

## AMRITA II PRE BOARD EXAMINATION - 2017 - '18

**Class : X** | **Marks : 80**
**Time : 3 hrs**

# संस्कृतम्

निर्देशाः

अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

| | | |
|---|---|---|
| खण्डः क | - अपठितांश अवबोधनम् | - 10 अङ्काः |
| खण्डः ख | - रचनात्मककार्यम् | - 15 अङ्काः |
| खण्डः ग | - अनुप्रयुक्त व्याकरणम् | - 25 अङ्काः |
| खण्डः घ | - पठित अवबोधनम् | - 30 अङ्काः |

## खण्डः क - अपठितांश अवबोधनम्

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत।**

अन्यस्य जनस्य हिताय यत्कार्यं चिन्तनं वा तदेव परोपकारः। मनुषस्यमध्ये प्रवृत्ति द्वयं दृश्यते एका स्वार्थस्य अपरा च परोपकारस्य एव। केचन तादृशाः अपि सन्ति येन स्वार्थं समीहन्ते, न च परोपकारं कुर्वन्ति। ते जनाः अतीव अधन्याः समाजाय च अभिशापरूप एव। यस्य केवला स्वार्थबुद्धिः सः राक्षसः इव सततम् आचरति। ततः वरतराः ते जनाः ये स्वार्थं सेवमानः अपि परार्थं चिन्तयन्ति। परं परोपकारिणः तु सर्वदैव परोपकारे संलग्नाः भवन्ति। ईदृशाः जनाः तु सर्वेषां हृदये विराजन्ते एव। ते क्षुधितस्य क्षुधांशमयन्ति, दरिद्रस्य च कामान् पूरयन्ति। येन लोकः तृप्तः आत्मानं अनुभवति। सज्जनानामिह भूतले आगमनं परोपकाराय एव भवति।

**I. एकपदेन उत्तरत।** **2**

i. मनुष्यस्य मध्ये कतिः प्रवृत्तिः दृश्यते?

ii. कीदृशाः जनाः सर्वेषां हृदये विराजते?

iii. 'परोपकारः' इत्युक्ते किम्?

iv. स्वार्थबुद्धि युक्तः जनः कः पश्यते?

**II. पूर्णवाक्येन उत्तरत।** **4**

i. सज्जनानां भूतले किमर्थम् आगमनं भवति?

ii. परोपकारिणः दरिद्रस्य कान् पूरयन्ति?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।** **2**

i. ‘निरन्तरम्’ इत्यर्थे किम् अव्ययपदं अत्र प्रयुक्तम्?
(स्वार्थं, सततम्, आगमनं, वरतरा:)

ii. ‘आचरित’ इति क्रियापदस्य किं कर्तृपदम् अस्ति?
(ये, स:, केचन, ते)

iii. ‘जनस्य’ अस्य किम् विशेशणपदम् अत्र प्रयुक्तम्?
(हिताय, कार्यं, यत्, अन्यस्य)

iv. ‘यादृशा:’ अस्य किं विलोम पदम् अत्र प्रयुक्तम्?
(तदैव, तादृशा:, अधन्या:, सेवमाना:)

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत।** 2

## खण्ड: ख - रचनात्मककार्यम्

**2. पितरं प्रति लिखितम् अध: पत्रं मञ्जूषापदसहायतया पूरयित्वा पुन: लिखत।** 5

मन्दाकिनी - छात्रावास:,
i. -------।

पूज्या: ii. -------! सादरं प्रणाम:।

अत्र कुशलं तत्राऽस्तु। इदं ज्ञात्वा भवन्त: iii. -------- भविष्यन्ति यत्गतदिवसे अन्तर्विद्यालयी संस्कृत-वादविवाद प्रतियोगितायां मया iv. -------- स्थानं प्राप्तम्। क्रीडादिवसेऽपि v. --------- अहमेव प्रथम: आसम्। अस्य वर्षस्य नवमकक्षाया: वार्षिक परीक्षायामपि मया एवं प्रथमं स्थानं vi. --------। विद्यालयस्य वार्षिकोत्सवार्थे मया त्रय: पुरस्कारा: vii. --------। अयं वार्षिकोत्सव: आगामि मङ्गलवासरे आयोजयिष्यते। विद्यालयपक्षत: viii. -------- ह्य: एव प्रेषितम्। अहमपि भवन्तं सूचयामि यत् ix. --------- सहभवान् अवश्यमेव आगच्छतु। एवं मम x. -------- भविष्यति। मातृचरणयो: मम प्रणाम:।

भवदीय: पुत्र:
नरेन्द्र:

| |
|---|
| निमन्त्रणपत्रम्, धावनप्रतियोगितायाम्, पितृचरणा:, नवदिल्लीत:, उत्साहवृद्धि:, प्रथमम्, प्राप्स्यन्ते, लब्धम्, मात्रा, प्रसन्ना:। |

**3. अध: प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत।** 10

मञ्जूषा-प्रदत्त-शब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चसंस्कृतवाक्येषु एकम् अनुच्छेदं लिखत।

छात्रजीवनम्

मञ्जूषा:

| |
|---|
| छात्रजीवनम्, अतीवउत्तमं, प्रथमसोपानम्, साफल्यं, धनोपार्जनम्, देशसेवा, साक्षर:, परिश्रमेण, विद्यार्जनम् |

अथवा



मञ्जूषा

| |
|---|
| बाला:, उत्तमं स्वास्थ्यं, योगाभ्यासं, भ्रामरीप्राणायामं, अनेके छात्राः, प्रसीदन्ति, प्राचीनापद्धति:, बालिका: |

## खण्डः ग – अनुप्रयुक्त व्याकरणम्

**4. अधोलिखित-वाक्येषु रेखांकितेषु पदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत।** **4**

i. दिल्लीनगरे षट् + मासा: तु उष्णा: भवन्ति।
(षण्मास:, षण्मासा:, षड्मासा:, षङ्मासो)

ii. कार्यक्रमस्तु सुनिश्चित:।
(कार्यक्रमा: + तु, कार्यक्रम: + तु, कार्यक्रुम: + तु, कार्यक्रमो + तु)

iii. सत्यमेवजे + अते नानृतम्।
(जेयते, जयति, जयते, जयेत्)

iv. साध्वादेश: अविचारणीय: भवति।
(साधु: + आदेश, साधु + आदेश:, साधो + आदेश:, साध्वो + आदेश:)

**5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत।** **4**

i. लम्बोदर: गणेश: सर्वप्रथम: पूज्य:।
(लम्ब उदरं यस्य स:, लम्बम् उदरं यस्य स:, लम्बोदर: यस्य स:, लम्ब: उदर: यस्य स:)

ii. शक्तिम् अनतिक्रम्य कार्यं कृत्वा जनक: पारिवारं पालयति।
(यथाशक्तिम्, शक्तिअनुसारम्, यथाशक्ति, यथाशक्तै)

iii. दशानन: सीताम् अपाहरत्।
(दश आनन: यस्य स:, दश आननानि, दशान्ति आननानि यस्य स:, दश आननानि

यस्य सः)

iv. रामलक्ष्मणौ विश्वामित्रस्य शिष्यौ आस्ताम्।

(रामश्चलक्ष्मणश्च, रामःचलक्ष्मणाःच, रामःलक्ष्मणौच, रामंलक्ष्मणंच)

**6. अधोलिखित-वाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत।** **4**

i. सर्वैः देशरक्षां नूनं कर्तव्य + टाप्।

(कर्तव्यम्, कर्तव्यः, कर्तव्यता, कर्तव्या)

ii. पितरौ सेव् + शानच् पुत्रः एव यशः लभते।

(सेवमानौ, सेवमानम्, सेवमानः, सेवमाना)

iii. सिंह + ङीप् एकमेव सिंहपुत्रं जनयति।

(सिंह + ई, सिंहनी, सिंहा, सिंही)

iv. मम भारतं दीन + ता न व्रजेत्।

(दीना, दीनता, दीनाम्, दीनताम्)

**7. अधोलिखित संवादं मञ्जूषायां दत्तैः पदैः वाच्यपरिवर्तनं कृत्वा पूरयित्वा च पुनः लिखत।** **3**

| ओदनं, पचति, मया |
|---|

नीना - भवति किं i. ---------?

मीना - मया ii. --------- पच्यते।

नीना - किं त्वमपि ओदनं खादसि?

मीना - आम् iii. -------- 'ओदनम्' खाद्यते।

**8. अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधक शब्दैः पूर्यन्ताम्।** **2**

| पादोन एक, सप्त, सपादएक, सार्धदश |
|---|

i. मम विद्यालयः (7:00) ------------ वादने आरम्भः भवति।

ii. विद्यालये (10:30) -------------- वादने अर्धावकाशः भवति।

iii. ततः (12:45) ---------------- वादने अन्तिमः कालांशः भवति।

iv. तत्पश्चात् (1:15) ------------ वादने पूर्णावकाशः भवति।

**9. अधोलिखित वाक्येषु रिक्तस्थानानि मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखत।** **4**

| मा, नूनम्, कदा, एव |
|---|

i. ---------- सः बालकः परिश्रमी अस्ति।

ii. जलम् ----------- जीवनं अस्ति।

iii. सूर्यग्रहणं ------------- भविष्यति?

iv. छात्राः यूयं कलहं ------------ कुरुत।

**10. अधोलिखितेषु वाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। अशुद्धः पदं संशोध्य लिखत।** **4**

i. अहम् अध्ययनशील: असि।
(अस्ति, अस्मि, स्त:, आसम्)
ii. मम मित्र: बुद्धिमान् अस्ति।
(मित्रम्, मित्रा:, मित्राणि, मित्रे)
iii. जीवने निरक्षराणां कृते अत्र बहुकार्यक्रमा: प्रचलन्ति।
(बहूनि, बहव:, बहूभि:, बहूनाम्)
iv. वृक्षाणां छेदनं मा करिष्यति।
(करिष्यन्ति, कुरुत, करोति, कुर्वन्तु)

## खण्ड: घ - पठित अवबोधनम्

**11. अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

**अ. गद्यांशं**

पर्यटनाधिकारी - साधु पृष्टम्। अत्र अनेके प्रमुखोत्सवा:। 'वाङ्चो' जनजातीनां प्रमुखं पर्व 'ओरिया' इति अस्ति। एतत् तु 'फरवरी' इति मासे मान्यते। अस्मिन् अवसरे कृषिभूमि पूजनं सेतुनिर्माणं च सामाजिक कार्यं क्रियते।

'मोपीन' इति अपि कृषिपर्व अस्ति। देवानामपि देव: 'मोपीन' इतिकथ्यते। 'होली' सदृशं एव पर्व इदम्। जना: परस्परं मुखे कपोले च शालिचूर्णं लिम्पन्ति। इदम् 'अप्रैल' इति मासे मान्यते। 'ओणम्' पर्वसमं 'साडकेन' एकम् अन्यत्पर्व अस्ति। लामासंप्रदाय 'लोसेर' इतिप्रमुखंपर्व अपि 'फरवरी' इतिमासे सम्पद्यते।

**I. एकपदेन उत्तरत।** **2**
i. वाङ्चोजनजातीनां प्रमुखं पर्व किम्?
ii. 'लोसेर' कस्य प्रमुखं पर्व?

**II. पूर्णवाक्येन उत्तरत।** **2**
'मोपीन' इति पर्वणि जना: किम्कुर्वन्ति?

**III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत।** **2**
i. 'उचितम्' इत्यर्थे अत्र किं पदं प्रयुक्तम्?
(सदृशम्, समम्, साधु, प्रमुखम्)
ii. उत्सव: इत्यर्थे अत्र किं पदं प्रयुक्तम्?
(पर्व, प्रमुखम्, मान्यते, देव:)
iii. 'असुर:' इत्यस्ये किं विलोम पदम् अत्र प्रयुक्तम्?
(जना:, देव:, साधु, उत्सव:)
iv. 'सम्पन्नो भवति' इत्यर्थे अत्र किं पदं प्रयुक्तम्?
(सम्पद्यते, कलयते, विराजयते, भवति)

**आ. पद्यांशं**

विद्वांस एव लोकेऽस्मिन्चक्षुष्मन्त: प्रकीर्तित:

अन्येषां वदने ये तु ते चक्षुनामनि मते।

**I. एकपदेन उत्तरत।** **2**

i. चक्षुष्मन्तः के कथिताः?

ii. केषां वदने नेत्रे चक्षुनामनि मते?

**II. पूर्णवाक्येन उत्तरत।** **2**

विद्वांस एव कुत्र चक्षुष्मन्तः प्रकीर्तिताः?

**III. प्रदत्त विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।** **2**

i. 'मुखे' इत्यस्य पर्याय पदम् अत्र किम्?
(लोके, वदने, चक्षुषि, मते)

ii. 'लोके' इत्यस्य विशेषणपदं किमत्र?
(अस्मिन्', एव, मते, वदने)

iii. 'अस्मिन्' इत्यस्य विभक्तिः किम्?
(पष्ठि, सप्तमि, प्रथम, द्वितीय)

iv. 'नयन' इत्यस्य पर्यायपदम् अत्र किम्?
(चक्षु, वदनं, मते, लोके)

**इ. नाट्यांशं**

राजहंसः - शान्तं शन्तम्। अहमेव नीरक्षीर विवेकी पक्षिणां राजा।

बकः - धिक्युष्मान्। अहमेव सर्वाशिरोमणिः (ततः प्रकृतिमाता प्रविशति)

प्रकृतिः - (सस्नेहं) अलम् अलम्मिथः कलहेन।

अहम्प्रकृतिः एव युष्माकं जननी। यूयं सर्वे एव ममप्रियाः। सर्वेषां महत्वं विद्यते यथासमयम्। सर्वैः एव मे शोभा। न तावत्कलहेन समयं वृथा यापयेत्। मिलित्वा एव मोदध्वं जीवनं चर समयं कुरुध्वम्।

**I. एकपदेन उत्तरत।** **2**

i. कः आत्मानं सर्वाशीरोमणि कथयति?

ii. का सर्वेषां जननी?

**II. पूर्णवाक्येन उत्तरत।** **2**

जीवनं कीदृशं कर्तव्यम्?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।** **2**

i. 'सर्वैः एव मे शोभा' अत्र 'मे' इति सर्वनामपदं कस्यै प्रयुक्तम्?
(प्रकृत्यै, बकाय, काकाय, राजहंसाय)

ii. 'मोदध्वम्' इति क्रियापदस्य कर्तृपदं किम्?
(सर्वेषाम्, यूयम्, युष्माकम्, मम)

iii. 'निरर्थकम्' इत्यर्थकंम् किं पदं नाट्यांशे प्रयुक्तम्?
(सस्नेहम्, वृथा, यथा, यापयेत्)

iv. 'स्नेहेन' इत्यस्यपदस्य कः विपर्ययः?
(वथा, रसमयम्, मोदध्वम्, कलहेन)

**12. रेखाङ्कितपदानि आधृत्य प्रश्न - निर्माणं कुरुत। 4**

i. सज्जना: शशिन: किरणसमा: भवन्ति।

ii. दानशालासु विचरन् राजा अचिन्तयत्।

iii. पठनस्य षट्गुणा: भवति।

iv. क्रोधात्सम्मोह: भवति।

**13. मञ्जूषात: समुचितपदानि चित्वा अधोलिखित श्लोकद्वयस्य अन्वयं पूरयत। 4**

| इति, दुष्करम्, प्रथम:, प्राणेभ्य:, चञ्चलं, बलवद्वदृढम्, निग्रहं, विशेषत: |
|---|

क. चञ्चलं हि मन: कृष्ण। प्रमाथिबलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव: सुदुष्करम्।
अन्वय: - कृष्ण! मन: हि i. -------- प्रमाथि ii. --------- अहं तस्य
iii. -------- वायो: इव iv. ------- मन्ये।

ख. आचार: प्रथमोधर्म: इत्येतद् विदुषांवच:।
तस्माद्रक्षेत्सदाचारं प्राणेभ्योऽपि विशेषत: ॥
अन्वय: - आचार: i. ------- धर्म: ii. -------- एतत्विदुषांवच: (अस्ति)
तस्मात् iii. -------- अपिसदाचारं iv. -------- रक्षेत्।

**14. अधोलिखित कथनानां समुचितं भावं विकल्पेभ्य: चित्वा लिखत। 4**

i. अवक्रता यथा चित्ते तथा वाचि भवेत्।
(सरलता, वक्रता, कठिनता, मधुरता)

ii. स: केनापि प्रकारेण परै: न परिभूयते।
(अन्यै:, सर्वै:, निजै:, जनै:)

iii. शारदा शारदाम्भोज वदना वदनाम्भुजे निवसेत्।
(शारदीया, बालिका, शारद: ऋतो:, सरस्वती)

iv. बोधिसत्व: बाल्यादेव औदार्य-गुणयुक्त: आसीत्।
(कृपणम्, दया, उदारता, दानम्)